॥ श्रीकृष्णाष्टकम् ॥

श्रीवासुदेव मधुसूदन कैटभारे लक्ष्मीश पक्षिवरवाहन वामनेति ।
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ १ ॥

गोविंद गोकुलपते नवनीतचोर श्रीनंदनंदन मुकुंद दयापरेति ।
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ २ ॥

नारायणाखिलगुणार्णव सर्ववेदपारायणप्रिय गजाधिपमोचकेति ।
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ३ ॥

आनंदसच्चिदखिलात्मक भक्तवर्गस्वानंददान चतुरागमसन्नुतेति ।
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ४ ॥

श्रीप्राणतोऽधिकसुकात्मकरूप देव प्रोद्यद्दिवाकरनिभाच्युत सद्गुणोति ।
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ५ ॥

विश्वांधकारिमुखदैवतवंद्य शश्वत्विश्वोद्भवस्थितिमृतिप्रभृतिप्रदेति ।
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ६ ॥

नित्यैकरूप दशरूप सहस्त्रलक्षानंत रूप शतरूप विरूप केति ।
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ७ ॥

सर्वेश सर्वगत सर्वशुभानुरूप सर्वांतरात्मक सदोदित सत्प्रियेति ।
श्रीकृष्ण मन्मरणकाल उपागते तु त्वन्नाम मद्वचनगोचरतामुपैतु ॥ ८ ॥

। इति श्री (अडवी)विष्णुतीर्थयतिविरचितं श्रीकृष्णाष्टकम् ।

॥ भारतीरमणमुख्यप्राणांतर्गत श्री कृष्णार्पणमस्तु ॥